यदागमः—'तावसिया जोइसिआ चरगपरिव्वायबंभलोगोजा' एवंजातीयोऽन्योऽपि धर्मोऽत्र नंगे ज्ञेय इति तृतीयो नंगः ॥ २०० ॥ अपरो धर्मश्च महेभ्यानरणवदंतःसारो बहिश्चाऽसारः, यथा अविरतसम्यग्दृष्टेर्धर्मः, तस्य सम्यग्देवगुरुधर्मश्रद्धानतदाराधनपरिणामपापजीरुत्वादिलक्षणायाः अंतःशुद्धेः सत्त्वेनांतःसारत्वात् ॥२०१॥ स्थूलवधाद्यविरतितपःकष्टानुष्ठानादिरहितत्वाभ्यां बहिरसारत्वाच्च, सत्यकिविद्याधरादेरिव; एतद्धर्माराधकाश्च नियमाद्वैमानिकदेवगतिवर्जमायुर्न बध्नंति; यदागमः—'सम्मदिट्ठी जीवो, विमाणवज्जं न बंधए आउं' इत्युक्तस्तृतीयो धर्मः॥ २०२ ॥

आगममां पण कह्युं छे के—' तापसो ज्योतिषी तथा चरकपरिव्राजको ब्रह्मलोक सुधि जाय छे.' वळी एवा प्रकारनो बीजो पण कोइ धर्म, आज जांगामां जाणवो; एवी रीते बीजो जांगो कह्यो ॥ २०० ॥ वळी कोइक धर्म शाहुकारना आभूषणनी पेठे अंदरथी सारवाळो अने बहारथी सारविनानो होय छे, जेम अविरति सम्यग् दृष्टिनो धर्म; केमके तेमां सम्यग् देवगुरु अने धर्मपर श्रद्धा, तथा तेना आराधनना परिणामरूप पापोथी रुरवापणुं इत्यादिक लक्षणवाळी अंदरनी शुद्धि होवाथी, ते अंदरथी सारभूत छे॥ २०१ ॥ तथा स्थूलहिंसा आदिकनी अविरति तथा तपरूप कष्ट क्रिया आदिकना रहितपणाथी ते सत्यकिविद्याधर आदिकनी पेठे बहारथी असार छे; वळी ते धर्मना आराधको निश्चयथी वैमानिक देवगति शिवायनुं आयु बांधता नथी; आगममां पण कह्युं छे के— सम्यग् दृष्टी जीव वैमानिक शिवायनुं आयु बांधतो नथी; एवी रीते त्रीजा प्रकारनो धर्म कह्यो ॥ २०२ ॥

अथ कश्चिद्धर्मोऽंतर्बहिश्च सारः, पृथ्वीपत्याज्ञरणवत्, यथा जैनः सर्वविरतिधर्मः, स हि यथोक्तांतःशुद्धिबहिःशुद्धिमत्त्वेन द्विधापि सार एव ॥ २०३ ॥ एतद्भावना सुबोधैवेति न प्रतन्यते, अस्माच्च धर्माज्जघन्यतः सौधर्मे, उत्कर्षतः सर्वार्थसिद्धे सिद्धौ च गतिर्जीवानामिति ॥ २०४ ॥ देशविरतिधर्मोऽप्येवाऽवतारणीयः, अंतःशुद्धिबहिःशुद्धिभावना देशतोऽत्रापि वाच्या; अतो धर्मादुत्कर्षतो द्वादशे कल्पे, जघन्यतः सौधर्मे च गतिः, दृष्टांता यथार्हं स्वयं वाच्याः, इति धर्मविषयां शुद्धिमधिकृत्योक्ता चतुर्भंगी ॥ २०५ ॥

वळी कोइक धर्म तो अंदरथी अने बहारथी एम बन्ने प्रकारे सारवाळो होय छे; जेम सर्व विरतिरूप जैन धर्म; ते यथोक्त रीते अंदरथी अने बहारथी पण शुद्धिवाळो होवाथी बन्ने रीते सारवाळोज छे ॥ २०३ ॥ तेनी भावना सुखे समजाय तेवीज छे, माटे तेनो विस्तार करता नथी; आ धर्मथी जघन्यपणे सौधर्म देवलोकमां, तथा उत्कृष्टी सर्वार्थसिद्धिमां तथा मोक्षमां जीवोनी गति थाय छे ॥ २०४ ॥ देशविरतिरूप धर्मने पण आ भांगामांज उतारवो; तथा तेमां पण देशथी अंदरनी शुद्धिनी तथा बहारनी शुद्धिनी भावना जाणी लेवी; तेमज आ देश विरतिरूप धर्मथी उत्कृष्टी बारमादेवलोकमां तथा जघन्यथी सौधर्म देवलोकमां गति जाणवी; तथा दृष्टांतो योग्यता पूर्वक पोतानी मेळेज जाणी लेवा. एवी रीते धर्म संबंधि शुद्धिने आश्रीने चोभंगी कही ॥ २०५ ॥

अथ सामान्यतो जीवानां धर्मगुणमधिकृत्य चतुर्भंगी; तथाहि—केचिज्जीवाः श्वपाकाञ्जरणवद्धर्मतोऽतर्बहिश्चाऽसाराः, हृदये परिणामतो बहिश्च क्रियातो धर्माऽभावात् ॥ २०६ ॥ काक्षसौकरिकादिवत् नरकादिगामिनश्चैते ज्ञेयाः ॥ २०७ ॥ अन्ये पुनर्गणिकाञ्जरणवदंतरसारा बहिश्च साराः, हृदये धर्मपरिणामस्याऽभावाद् बहिस्तत्क्रियासमाचरणाच्च, द्वादशवर्षीययतिवेषोदायिनृपवधकसाधुवत् ॥ २०८ ॥ त्रिग्राममध्यवासिकूटङ्गपकवच्च; एते च केचिदिहाऽप्यऽनर्थभाजनं स्युस्तद्भवयवदेव, प्रेत्य च नरकादिगामिनो ज्ञेयाः ॥ २०९ ॥ केचित्पुनरनतिक्षुद्रमनसः क्रियाऽभ्यासादिना प्रेत्य बोधिमपि लभंते; तत आसन्नसिद्धिका अपि भवंति, निदर्शनं प्राग्वत् ॥ २१० ॥

हवे सामान्यथी जीवोना धर्मगुणने आश्रीने चोभंगी कहे छे—केटलाक जीवो चांडालना आभूषणनी पेठे धर्मथी अंदर अने बहार एम बन्ने प्रकारे सारविनाना होय छे; केमके तेओना हृदयमां परिणामरूपे तथा बहारथी क्रियारूपे धर्मनो अभाव होय छे ॥ २०६ ॥ तथा तेओने काक्षसौकरिकादिकनी पेठे नरक आदिकमां जनारा जाणवा ॥ २०७ ॥ वळी बीजा केटलाक जीवो वेश्याना आभूषणनी पेठे अंदरथी सारविनाना तथा बहारथी सारवाळा होय छे, केमके तेओना हृदयमां धर्म परिणाम होतो नथी, परंतु बहारथी ते संबंधि क्रिया आचरे छे; (कोनी पेठे? तोके) बार वर्षो सुधि साधुनो वेष धरनारा उदायी राजाने मारनार साधुनी पेठे; ॥ २०८ ॥ तथा त्रण गामनी वच्चे रहेनार कूटसाधुनी पेठे; वळी तेओ बन्नेनी पेठे तेवा केटलाको आ लोकमां पण अनर्थना पात्ररूप थाय छे, तथा परलोकमां पण तेओने नरक आदिकमां गमन करनारा जाणवा ॥ २०९ ॥ वळी केटलाको अतिक्षुद्र मनवाळा न होवाथी क्रियाना अभ्यास आदिकथी परभवमां बोधिबीजने पण प्राप्त थाय छे, अने तेथी नजदीक सिद्धिवाळा पण थाय छे; अहीं दृष्टांत पूर्वनी पेठेज जाणी लेवां ॥ २१० ॥

वरदत्तश्रेष्टिदासीपुत्रादयः; केचित्तु तद्भवेऽपि सम्यग् धर्ममपि लभंते, क्षुल्लककुमारवत्, नगपरिणीतनागिलाध्यानपरभ्रातृभवदेवोपरोधवशबहुवर्षद्रव्यलिंगधारकभवदत्तवच्चेति द्वितीयो भंगः ॥ २११ ॥ अपरे पुनर्महेभ्याभरणवदंतः साराः, हृदये धर्मपरिणामवत्त्वात् ब्रह्मभद्रमहर्षिसेवकमृगवत्; बहिस्त्वसाराः, धर्मक्रियारहितत्वेन, तथा चागमः—सुइं च लद्धुं सद्धं च। वीरिअं पुण दुल्लहं । बहवे रोअमाणावि । नोअणं पडिवज्जए ॥ २१२ ॥ एते चासन्नसिद्धिकाः स्युः, प्रायः क्रियानुष्ठानं विना भवतरणाऽसिद्धेः ॥ यदुक्तं—जाणंतो विहु तरिउं । काइयजोगं न जुंजई जोउं ॥ सो बुड्डइ सोएणं । एवं नाणी चरणहीणो ॥ २१३ ॥

वरदत्त शेठना दासीपुत्र आदिकनां दृष्टांतो जाणवां. वळी केटलाको तो ते भवमां पण सम्यग् धर्मने पण पामे छे; (कोनी पेठे तोके) क्षुल्लक कुमारनी पेठे तथा नवी परणेली नागीला नामनी स्त्रीना ध्यानमां तत्पर रहेला तथा पोताना नाइ भवदेवना आग्रहना वशथी घणा वर्षो सुधि द्रव्य लिंगने धरनारा भवदत्तनी पेठे; एवी रीते बीजो भांगो जाणवो ॥ २११ ॥ वळी बीजा केटलाक जीवो शाहुकारना आभूषणनी पेठे अंदरथी सारवाळा होय छे, केमके तेओना हृदयमां ब्रह्मभद्र महर्षिना सेवक मृगनी पेठे धर्मनो परिणाम होय छे, तथा धर्म क्रियाथी रहित होवाथी बहारथी सारविनाना होय छे; आगममां पण कहुं छे के—धर्म संबंधि तथा श्रद्धा तो मळवी सहेली छे, परंतु ते माटे वीर्य फोरवबुं दुर्लभ छे; केमके घणाओने धर्म संबंधि रुचि तो थाय छे, परंतु ते पमिवजता नथी, एटले ते धर्म मुजब क्रिया करी शकता नथी ॥ २१२ ॥ एवी रीतना उपर वर्णवेला जीवो नजदीक मोक्षगामी होय छे, केमके प्रायें करीने क्रियाना अनुष्ठानविना संसार तरी शकातो नथी ॥ कहुं छे के—तरवाने जाणतो एवो पण मनुष्य जो कायिकयोगने न जोडे, अर्थात् जो पोताना हाथ पग हलाववारूप क्रिया न करे, तो ते बुडे छे, एवी रीतेज चारित्र विनानो ज्ञानी पण जाणवो ॥ २१३ ॥

इति तृतीयो भंगः ॥ अन्ये पुनर्नृपाभरणवद् बहिरंतश्च साराः, यथा देशविरताः श्रीकुमारपालादयः, सर्वविरताः श्रीवीरप्राच्यभवनंदनर्ष्यादयश्च ; एते च तत्रैव भवे तृतीयादिभवेषु वा सिद्धिगामिन इति चतुर्थो भंगः ॥ २१४ ॥ एवं गुरुश्रावकधर्मजीवगते पृथग् भंगचतुष्टयेऽस्मिन् ॥ यतध्वमंत्यद्वितयेषु चेतो । निवेश्य भावारिजयश्रिये ज्ञाः ॥ २१५ ॥

॥ इति तपागच्छे श्रीमुनिसुंदरसूरिविरचिते श्रीउपदेशरत्नाकरे श्रीगुरुपरीक्षाधिकारे पंचदशस्तरंगः समाप्तः ॥

एवी रीते त्रीजो भांगो जाणवो ॥ वळी केटलाक जीवो तो राजाना आभूषणनी पेठे बहारथी अने अंदरथी पण सारवाळा होय छे, जेम देशविरतिधारी श्रीकुमारपाळ राजा आदिको, तथा सर्वविरति एवा श्री वीरभगुना पूर्व भववाळा नंदन ऋषि आदिको; वळी तेओ तेज भवे अथवा त्रीजा आदिक भवोमां मोक्षगामी होय छे; एवी रीते चोथो भांगो जाणवो ॥ २१४ ॥ एवी रीते गुरु, श्रावक, धर्म, तथा जीवने आश्रीने कहेला एवा आ पृथक्भूत चारे भांगाओमांथी छेल्ला बेमां मन राखीने, हे पंडितो! तमो भावशत्रुओने जीतवानी लक्ष्मी माटे प्रयत्न करो ॥ २१५ ॥

॥ एवी रीते श्रीतपगच्छमां श्रीमुनिसुंदरसूरिजीए रचेला श्रीउपदेशरत्नाकर नामना ग्रंथमां श्रीगुरुपरीक्षाना अधिकारमां पंनरमो तरंग समाप्त थयो ॥ श्रीरस्तु ॥

इति पंचदशस्तरंगः समाप्तः

अथ षोडशस्तरंगः

अथ करंमोपमया श्रीचतुर्नंगीमाह—मूलम्—सोवागवेसगिहवइ—रायकरंमोवमा चउह गुरुणो ॥ सुअचरणाईहिं—जहुत्तरं असाराय साराय ॥ १ ॥

हवे करंमीयानी उपमावमे करीने चतुर्नंगी कहे छेः—मूलनो अर्थः—चांमाल, वेश्या, गृहपति तथा राजाना करंमीयानी उपमावाळा श्रुत तथा चारित्र आदिकें करीने उत्तरोत्तर सारविनाना तथा सारवाळा एम चार प्रकारना गुरुओ होय छे ॥ १ ॥

व्याख्या—श्वपाकादीनां करंकैरुपमा येषां ते चतुर्धा गुरवो भवंति, श्रुतचरणादिभि-रसद्भिः सद्भिः सातिशयैश्च हेतुभूतैर्यथोत्तरं असाराः साराश्चेति भंगद्वयेन चतुर्भं-गीसूचनादसारतमा असाराः, साराः सारतमाश्च भवंतीत्युक्तिसंटंकः ॥ २ ॥ तत्र श्रुत-मर्हत्प्रणीतागमः, चरणं पंचमहाव्रतादि; तथा चागमः—वय (५) समणधम्म (१०) संयम (१७)। वेआवच्चं (१०) च बंभगुत्तिओ (९) ॥ नाणाइतिगं (३) तव (१२)। कोहनिग्गहाइ (४) चरण मेअं ॥ ३ ॥ आदिशब्दात्करणा-दिग्रहः, श्रीसूरिविशेषगुणातिशयलब्धिप्रभृतिग्रहश्च, तत्र करणं पिंडविशुद्ध्यादि, यदागमः ॥ ४ ॥

व्याख्या—चांडाल आदिकोना करंडीयाओनी जे उपमा जेओने एवा चार प्रकारना गुरुओ होय छे; असतां तथा सतां अने अतिशयोवाळा हेतुरूप एवा श्रुतज्ञान तथा चारित्र आदिकोवडे करीने उत्तरोत्तर सारविनाना तथा सारवाळा एम बे भांगाओवडे करीने चोभंगीना सूचनथी वधारे सारविनाना तथा सारविनाना अने सारवाळा तथा वधारे सारवाळा गुरुओ होय छे, एवो संबंध छे ॥ २ ॥ त्यां श्रुत एटले श्रीअरिहंत प्रभु-ए प्ररूपेलुं आगम, तथा चारित्र एटले पंचमहाव्रतो, दश प्रकारनो श्रमणधर्म, सत्तर भेदे संयम, दश प्रकारनुं वैया-वच्च, नव ब्रह्मचर्यनी गुप्तिओ, ज्ञान, दर्शन, चारित्र, बार भेदे तप, तथा क्रोध आदिक चार कषायोनो निग्रह ए चरण सित्तेरी रूप चारित्र छे ॥ ३ ॥ आदि शब्द थकी करण आदिकने पण ग्रहण करवां; तेमज आश्चर्य संबंधि विशेष गुणो अतिशयो तथा लब्धि आदिकोनो पण संग्रह करवो; तेमां करण एटले पिंडविशुद्धि आदिक; आगममां पण कह्युं छे के—॥ ४ ॥

पिंडविसोही (४) समिई (५)। भावण (१२) पडिमा (१२)य इंदियनिरोहो (५) ॥ पडिलेहण (२५) गुत्तीओ (३)। अभिग्गहा (४) चेव करणंतु ॥ ५ ॥ श्रीसूरिविशेषगुणाः प्रतिरूपत्वादयः, तदुक्तं—पडिरूवो तेअस्सी जुगप्पहा० (१) अपरिस्सावि० (२) ॥ ६ ॥ अतिशयाः पुनः सार्धयोजनद्व्यादौ दुर्भिक्षक्रमरहरत्वादयः, विद्यामंत्रचूर्णादिप्रयोगजन्मानो वा वशीभूतदेवतादिजनिता वा चमत्कारविशेषाः ॥ ७ ॥ लब्धयस्तु क्षीरास्रवादयः कफविप्रुण्मलामर्षौषध्यादयोऽवधिज्ञानादयश्चेति ॥ ८ ॥ अथैतद्भाव्यते—यथा श्वपाककरंकश्चर्मपरिकर्मोपकरणवर्धादिचर्माशस्थानतयाऽत्यंतमसारः, तथा पार्श्वस्थादयः षट्प्रज्ञकगाथाज्योतिषादिरूपसूत्रार्थधारिणस्तथाविधयतिक्रियाविकलाश्चेत्यत्यंतमसाराः ॥ ९ ॥

चार प्रकारनी पिंडविशुद्धी, पांच प्रकारनी समिति, बार भावना, बार पडिमा, पांच इंद्रिओनो निरोध, पचीस पडिलेहणा, त्रण गुप्ति, तथा चार अभिग्रह एवी रीते करणसित्तेरी जाणवी ॥ ५ ॥ आचार्यना विशेष गुणो प्रतिरूप आदिक जाणवा. कह्युं छे के—प्रतिरूप, तेजस्वी, युगप्रधान आदिक ॥ ६ ॥ अतिशयो एटले अढी योजन आदिकमां दुकाळ तथा जयने हरकापणा आदिकरूप, तथा विद्या, मंत्र तथा चूर्ण आदिकना प्रयोगथी उत्पन्न थयेला, अथवा वश थयेला एवा देवता आदिके उत्पन्न करेला चमत्कार विशेषो जाणवा ॥ ७ ॥ लब्धिओ एटले क्षीरास्रव आदिको, तथा कफ, शुक, मल, आमर्ष औषधी आदिक तथा अवधिज्ञान आदिक जाणवी ॥ ८ ॥ हवे तेनुं विशेष व्याख्यान कहे छे—जेम चांडालनो करंडीयो चांबडांनो मढेलो तथा ते संबंधि उपकरणरूप वाधरी आदिक चर्मना अंशना स्थानपणायें करीने अत्यंत सारविनानो छे; तेम पासत्था आदिको षट् प्रज्ञक गाथा, ज्योतिष आदिकरूप सूत्रार्थने धरनारा छे, तथा तेवी रीतनी साधु क्रिया विनाना होवाथी तेओ अत्यंत सारविनाना छे ॥ ९ ॥

तेषां तथाविधश्रुतस्य यत्तत्क्रियाणां च सावद्यत्वेन परेषां धर्माऽनास्थामिथ्यात्वादिपोषकत्वेन च चर्माशादिसमत्वात्; एतद्भावना च पूर्वगाथायां श्वपाकाभरणदृष्टांतभावनायां कृतास्तीति ततो विशेषार्थिभिर्ज्ञेया ॥ १० ॥ यथा च वेश्याकरंडको जतुपूरितस्वर्णाभरणादिस्थानत्वात् श्वपाकाभरणतः सारोऽपि वक्ष्यमाणकरंडापेक्षयाऽसारः ॥ ११ ॥ तथा केचिद् दुरधीतश्रुतलवाः किंचित् क्रियाप्रवर्त्तनेन वागाडंबरेण च मुग्धजनमावर्जयंतोऽपि परीक्षाया अक्षमत्वादऽसाराः; पार्श्वस्थादिभ्यः किंचित्सारत्वेऽप्येतेषां विशिष्टचारित्र्यपेक्षया असारत्वमिति ॥ १२ ॥

વળી તેઓનું તેવી રીતનું શ્રુત, જે તે ક્રિયાના સાવદ્યપણાયેં કરીને અન્યોને ધર્મની અનાસ્થા તથા મિથ્યાત્વ આદિકના પોષકપણાયેં કરીને ચર્માંશાદિક સમાન છે; વળી તેની ભાવના પૂર્વની ગાથામાં ચાંડાલના આભૂષણના દૃષ્ટાંતની ભાવનામાં કરેલી છે, માટે વિશેષ જાણવાના અર્થીઓએ ત્યાંથી જાણવી ॥ ૧૦ ॥ વળી જેમ વેશ્યાનો કરંડીયો લાખથી ભરેલાં સુવર્ણના આભૂષણ આદિકના સ્થાનરૂપ હોવાથી ચાંડાલના આભૂષણથી જોકે સારવાળો છે, તોપણ આગળ કહેવામાં આવનારા કરંડીયાની અપેક્ષાયેં સારવિનાનો છે ॥ ૧૧ ॥ તેમ કેટલાક ગુરુઓ, કે જેઓ મહા મુશ્કેલીથી શ્રુતનો લેશ માત્ર જાણેલા છે, તેઓ કંઇક ક્રિયાના પ્રવર્ત્તને કરીને તથા વચનના આડંબરથી જોકે ભોળા લોકોને સમજાવી લે છે, તો પણ (ગુરુ સંબંધિ ખરી) પરીક્ષામાં પસાર નહીં થતા હોવાથી તેઓ સારવિનાના છે; જોકે પાસત્થા આદિકોથી તેઓમાં કિંચિત્ સારપણું છે, તતાં પણ વિશેષ ચારિત્રવાનની અપેક્ષાયે તેઓમાં અસારપણું છે ॥ ૧૨ ॥

तथा गृहपतिः श्रीमान् कौटुंबिकः, तस्य करंको यथा विशिष्टमणिस्वर्णाभरणादिस्थानत्वात् सारः, एवं केचिद् गुरवः स्वसमयपरसमयज्ञाः सम्यक्क्रियादिगुणयुक्ताश्चेति साराः ॥ १३ ॥ तथा च राज्ञः करंडकोऽमूल्यरत्नजटिताभरणाऽमूल्यरत्नादिस्थानत्वात्सारतमः, तथा केचिद् गुरवः समस्ताचार्यगुणभृतो विशिष्टातिशयविविधलब्धिसमृद्धिपदं चेति सारतमाः, श्रीगौतमश्रीसुधर्मस्वामिश्रीभद्रबाहुश्रीस्थूलभद्रादिवत् ॥ १४ ॥ श्रुत्वा तदेवं गुरुगोचरां चतुर्भंगीं करंकोपमया स्फुटीकृतां ॥ सदाऽऽदियध्वं सुगुरून् बुधा यदि । स्पृहा भवद्भेषिजयश्रियेऽस्ति वः ॥ १५ ॥

॥ इति तपागच्छनायकश्रीमुनिसुंदरसूरिविरचिते श्रीउपदेशरत्नाकरे षोडशस्तरंगः समाप्तः ॥

तथा गृहपति एटले लक्ष्मीवान् कुटुंबी, तेनो करंडीयो जेम उंचां मणि तथा सुवर्णना आभूषण आदिकना स्थानरूप होवायी सारवाळो छे, तेम केटलाक गुरुओ पोताना अने परना सिद्धांतोने जाणता थका उत्तम क्रिया आदिकना गुणवाळा होय छे, माटे तेओ सारावाळा छे ॥ १३ ॥ वळी राजानो करंडीयो जेम अमूल्य रत्नोथी जडेला आभूषणो तथा अमूल्य रत्न आदिकोनां स्थानरूप होवायी वधारे सारवाळो छे, तेम केटलाक गुरुओ आचार्यना सर्व गुणोथे संपन्न तथा विशिष्ट प्रकारना अतिशयो अने नाना प्रकारनी लब्धिओनी समृद्धिना स्थानरूप होवायी वधारे सारवाळा छे; (कोनी पेठे ? तो के) श्री गौतमस्वामी, सुधर्मास्वामी, श्रीभद्रबाहुस्वामी तथा श्रीस्थूलभद्र आदिकोनी पेठे ॥ १४ ॥ माटे एवी रीते करंडीयानी उपमाथी प्रगट करेली गुरु संबंधि चोभंगीने सांभळीने हे पंडितो! जो तमोने संसाररूपी शत्रुने जीतवानी लक्ष्मीनी वांछा होय, तो तमो सुगुरुओनो आदर करो ?॥ १५ ॥

॥ एवी रीते श्रीतपगच्छनायक श्रीमुनिसुंदरसूरिए रचेला श्रीउपदेशरत्नाकर नामना ग्रंथमां सोळमो तरंग समाप्त थयो ॥ श्रीरस्तु ॥

इति षोऽशस्तरंगः समाप्तः

अथ सप्तदशस्तरंगः

अथ रत्नदृष्टांतेन पुनर्गुरुचतुर्भंगीं प्रस्तावतः सामान्यजीवादिचतुर्भंगीश्चाह—मूलम्—मज्झबहिसारऽसारा । रयणावायरिअसमणसड्ढजिआ सपरुभयाणुभयाणे । वयारओ हुंति चउभेया ॥ १ ॥

वळी रत्ननना दृष्टांते करीने फरीने गुरु संबंधि चोभंगी तथा प्रस्तावथी सामान्य जीवआदिकोनी पण चोभंगी कहे छे—मूळनो अर्थः—आचार्यो, साधुओ, श्रावको अने सामान्य जीवो पोताने, परने, बन्नेने तथा अनुभयने उपकारना हेतुथी रत्नोनी पेठे अंदरथी अने बहारथी सारवाळा तथा सारविनाना थया थका चार प्रकारना होय छे ॥ १ ॥

व्याख्या—आचार्याः श्रमणाः श्राद्धाः सामान्यतो जीवाश्च रत्नानीव मध्ये बहिःसारा असाराश्च भवंतीति चतुर्भंगी ॥ २ ॥ तत्र रत्नानामंतःसारत्वं अगर्जितत्वाऽजंगुरत्वादिभिः, बहिःसारत्वं पुनस्तादृक् तेजोविशेषादिना; आचार्यादीनां बहिरंतःसारत्वे सूत्रकार एव हेतुमाह ॥ ३ ॥ सपरभयाणुभयाणोवयारओत्ति, स्वस्य स्वजीवस्य, परेषामन्यभव्यसत्वानां तदुभयस्य अनुभयस्य चोपकारतो हेतोश्चतुर्भेदा भवंतीति गाथार्थः ॥ ४ ॥ एतद्भावयति, यथा कानिचिद्रत्नानि मध्ये बहिश्चाऽसाराणि, यथा काचमणिः ॥ ५ ॥ कानिचिच्चांतरसाराणि बहिश्च साराणि मंडूक्यादिगर्भितरत्नवत् ॥ ६ ॥

व्याख्या—आचार्यो, साधुओ श्रावको अने सामान्य जीवो रत्नोनी पेठे अंदरथी अने बहारथी सारवाळा तथा सारविनाना होय छे, एम चोभंगी जाणवी ॥ २ ॥ तेमां रत्नोनुं अंदरथी सारपणुं अगर्जितपणाथी तथा अजंगुरपणा आदिकथी जाणवुं; अने बहारथी सारपणुं तो तेवा प्रकारना तेज विशेष आदिकथी जाणवुं; हवे आचार्य आदिकोना बहारथी अने अंदरथी सारपणामां सूत्रकारज हेतु कहे छे ॥ ३ ॥ पोताने एटले पोताना जीवने, परने एटले बीजा भव्य प्राणीओने, तेओ बन्नेने तथा अनुभयने (एटले तेओ बन्नेमांथी एकेने पण नहीं) उपकारना हेतुथी ते आचार्य आदिको चार प्रकारना होय छे, एवो गाथानो अर्थ छे ॥ ४ ॥ हवे तेनी विशेष समज कहे छे; जेम कटलांक रत्नो, जेवांके काच, ते अंदरथी अने बहारथी पण सारविनाना होय छे ॥ ५ ॥ वळी केटलांक रत्नो अंदर सारविनाना तथा बहारथी सारवाळां होय छे, जेवांके देडकी आदिक जेना गर्भमां छे, एवां रत्नो ॥ ६ ॥

कानिचित्पुनरंतःसाराणि बहिश्चाऽसाराणि खन्यादिमृन्मलिनजात्यरत्नवत् ॥ ७ ॥ कानिचिन्मध्ये बहिश्च साराण्येव, यथाविधसंस्कृतकोटीमूल्यादिप्रसिद्धजात्यरत्नवदिति ॥ ८ ॥ तथा केचिदाचार्याः प्ररूढप्रमादत्वेनोभयलोकैकांतिकहितं चारित्रधर्मं शिथिलयंतः स्वात्मनोऽप्यनुपकारिणः इत्यंतरऽसाराः ॥ ९ ॥ अन्यसत्त्वेभ्योऽपि सम्यगुपदेशनादिना तं धर्मं न ददतीत्यन्येषामपि नोपकारिणः, इति बहिरसाराश्च ॥ १० ॥ ते च पार्श्वस्थादयो ज्ञेयाः, तत्स्वरूपं च प्राच्यगाथयोरुक्तमिति प्रथमो भंगः ॥ ११ ॥

वळी केटलांक रत्नो अंदर सारवाळां तथा बहारथी सारविनाना होय छे, जेवांके खाण आदिकनी माटीथी मलीन थयेलां उत्तम रत्नो ॥ ७ ॥ वळी केटलांक रत्नो अंदरथी अने बहारथी पण सारवाळांज होय छे, जेवांके योग्यता पूर्वक पालीश करेलां क्रोडोनी कीमतवाळा उत्तम रत्नो ॥ ८ ॥ एवी रीते केटलाक आचार्यो घणा प्रमादे करीने बन्ने लोकमां एकांत हितकारी एवा चारित्रधर्मने शिथिल करता थका पोतानो पण उपकार करी शकता नथी, माटे तेओ अंदरथी सारविनाना छे ॥ ९ ॥ तेमज अन्य प्राणीओ प्रत्ये पण उत्तम देशना आदिकें करीने ते धर्म तेओ आपी शकता नथी, माटे तेओ बीजाओपर पण उपकार करी शकता नथी, एटला माटे तेओ बहारथी पण सारविनाना छे ॥ १० ॥ अने तेवा गुरुओ पासत्या आदिकोने जाणवा, अने तेओनुं स्वरूप पूर्वनी बन्ने गाथाओमां कहुं छे, एवी रीते पहेलो भांगो जाणवो ॥ ११ ॥

केचित्पुनर्द्वितीयरत्नवदंतरसाराः, स्वस्याऽनुपकारित्वात्, भावना प्राग्वत्; बहिस्तु साराः, सूत्रार्थप्रदानादिभिः शिष्यवर्गस्य, विहारदेशनादिभिरन्यभव्यसत्त्वानां चेह परत्र च द्रव्यतो भावतश्चोपकारकारित्वात् ॥ १२ ॥ एते च संविज्ञपाक्षिका ज्ञेयाः, तथा च तल्लक्षणं—सुद्धं सुसाहुधम्मं । कहेइ निंदइ य निअयमायारं ॥ सुतवस्सिआणपुरओ । होइ अ सव्वोमरायणिओ ॥ १३ ॥ वंदइ न य वंदावइ । किइकम्मं कुणइ कारवे नेअ ॥ अत्तट्ठा न वि दिक्खइ । देइ सुसाहूण बोहेउं ॥ १४ ॥

वळी केटलाक गुरुओ बीजा रत्ननी पेठे अंदरथी सारविनाना होय छे, केमके तेओ पोतानो उपकार करी शकता नथी, ते संबंधि भावना पूर्वनी पेठे जाणवी; वळी तेओ बहारथी सारवाळा होय छे, केमके तेओ सूत्रार्थनी वाचना आदिकवडे करीने शिष्य वर्गनो तथा विहार अने देशना आदिके करीने बीजा भव्य प्राणीओनो आ लोक अने परलोक संबंधि द्रव्यथी अने भावथी उपकार करी शके छे ॥ १२ ॥ अने तेवा संवेगपक्षी गुरुओ जाणवा. वळी तेवा संवेगपक्षीओनुं लक्षण नीचे मुजब कहुं छे— संवेगपक्षी गुरुओ शुद्ध तथा उत्तम साधु धर्म कहे, तथा पोताना आचारने निंदे, तथा उत्तम तपस्वी मुनिराजनी पासे सर्व प्रकारे नम्रता आचरे ॥ १३ ॥ पोते अन्य साधुओ प्रत्ये वंदन करे, परंतु पोताने कोइ पासे वंदावे नहीं, पोते कृतिकर्म करे, परंतु बीजा पासे पोतानुं करावे नहीं, पोता वाटे कोइने दीक्षा आपे नहीं, परंतु पोते प्रतिबोधीने उत्तम साधु पासे कोइने दीक्षा अपावे ॥ १४ ॥

इति द्वितीयो भंगः ॥ केचिच्च तृतीयरत्नवदंतःसाराः, स्वात्मोपकारैकपरत्वात्; बहिस्त्वसाराः, आत्मार्थैकनिष्टत्वेन परेषां शिष्यगच्छश्राद्धादीनां तत्तिपरिहारादिनाऽनुपकारित्वात् ॥ १५ ॥ यथा श्रीआर्यमहागिरिसूरयः, ते हि श्रीआर्यसुहस्तिन्यो गच्छं दत्वा तदा जिनकल्पस्य व्यवच्छेदाज्जिनकल्पार्हवृत्त्या गच्छनिश्रास्था व्यहार्षुः ॥१६॥ अन्यदा श्रीसुहस्तिसूरयो विहरंतः पाटलीपुत्रपत्तनमाजग्मुः, तत्र सुनूतिः श्रेष्ठी श्रीगुरुवचनात् प्रतिबुद्धः श्राद्धोऽभूत् ॥ १७ ॥ श्रीगुरुक्तधर्मानुवादेन स्वजनान् बोधयति, परं ते नाऽबुध्यंताल्पमेधसः; ततस्तत्प्रतिबोधायाहूताः श्रीसुहस्तिगुरवस्तद्गृहमापुः, देशनां प्रारेभिरे ॥ १८ ॥

एवी रीते बीजो भांगो जाणवो ॥ वळी केटलाक गुरुओ त्रीजा रत्ननी पेठे अंदरथी सारवाळा होय छे, केमके तेओ फक्त पोताना उपकारमां तत्पर होय छे; परंतु तेओ बहारथी सारविनाना होय छे, केमके तेओ फक्त स्वार्थमांज तत्पर होवाथी शिष्योनां तथा गच्छवासी श्रावक आदिक अन्योना दुःखने दूर करवारूप उपकार करी शकता नथी ॥ १५ ॥ जेम श्रीआर्यमहागिरि आचार्य तेओ श्रीआर्यसुहस्ति महाराज प्रत्ये गच्छ सोंपीने ते वखते जिनकल्पीपणानो विच्छेद थयेलो होवाथी जिनकल्पी जेवी वृत्तियें करीने गच्छनी निश्रामां रह्या थका विहार करवा लाग्या ॥ १६ ॥ एक वखते श्रीआर्यसुहस्ति महाराज विहार करता थका पाटलीपुत्र नगरमां पधार्या; त्यां सुनूति नामनो एक शेठ श्रीगुरु महाराजना वचनथी प्रतिबोध पामीने श्रावक थयो ॥१७॥ तथा श्रीगुरु महाराजे कहेला धर्मना अनुवादे करीने स्वजनोने उपदेश देवा लाग्यो; परंतु तेओ थोडी बुद्धिवाळा होवाथी प्रतिबोध पाम्या नहीं; तेथी तेमने प्रतिबोधवा माटे तेणे श्रीआर्यसुहस्ति महाराजने बोलाववाथी गुरुमहाराज तेने घेर पधार्या; तथा देशना देवा लाग्या ॥ १८ ॥

तावत्तत्र भिक्षार्थं प्राविशत् आर्यश्रीमहागिरिः, श्रीसुहस्तीतमभ्युत्थायाऽवंदत, ततः सहसा भिक्षामगृहीत्वैव न्यवर्त्तत श्रीमहागिरिगुरुः ॥ १९ ॥ तथा दृष्ट्वा श्रीसुहस्तिगुरुं श्रेष्ठ्युवाच, युष्माकमपि कोऽप्यस्ति किं गुरुः, सूरिः—श्रेष्ठिन्नस्माकमेते गुरवः त्यागार्हभक्तादिभिक्षामाददते सदा; अत्र तद्गुणवर्णनं ॥ २० ॥ तच्छ्रुत्वा जातश्रद्धः स श्राद्धः स्वजनानूचे, ईदृशं मुनिं यदा पश्यत तदा भक्तादिकं त्यज्यमानं दर्शयित्वा तस्मै देयं, यथा महाफलं स्यात् ॥ २१ ॥ ततो द्वितीयेऽह्नि तैस्तथादीयमाने उपयोगेन तमाहारमशुद्धं विज्ञायाऽनादाय च वसतौ गत्वा श्रीसुहस्तिनमुपालब्धवान् ॥ २२ ॥

एटलामां त्यां श्रीआर्यमहागिरि महाराज भिक्षा माटे पधार्या; त्यारे श्रीसुहस्ती महाराज उभा थइने तेमने वांदवा लाग्या, त्यारे श्रीमहागिरि महाराज भिक्षा लीधाविनाज त्यांथी तुरत पाछा वळ्या ॥ १९ ॥ ते जोइने शेठ श्रीसुहस्ति महाराजने कहेवा लाग्या के, आपना पण शुं कोइ गुरु छे? त्यारे आचार्य महाराजे कह्युं के, हे शेठ! अमारा ते गुरु छे; तथा ते हमेशां* त्याग लायक भोजन आदिकनी भिक्षा ले छे; एम कही अहीं तेमना गुणोनुं तेमणे वर्णन कर्युं ॥ २० ॥ ते सांभळीने थयेल छे श्रद्धा जेने एवो ते श्रावक स्वजनोने कहेवा लाग्यो के, आवा मुनिने ज्यारे तमो जुओ, त्यारे तजवानुं भोजन आदिक देखामीने तेने देवुं, के जेथी मोटुं फल थाय ॥ २१ ॥ पछी बीजे दिवसे तेओ तेवी रीते ज्यारे आहार देवा लाग्या, त्यारे उपयोगथी ते आहारने अशुद्ध जाणीने, ग्रहण कर्या विना उपाश्रये जइने महागिरिजी सुहस्तीजीने उभको देवा लाग्या के ॥ २२ ॥

* नांखी देवालायक अरस नीरस भोजन.

यत् त्वया ह्यो विनयं कृत्वाऽस्माकमनेषणा कृतेति; ततो नेवं भूयः करिष्ये इत्युक्त्वा श्रीसुहस्ती तं क्षमयामासेति ॥ २३ ॥ एवं ये गणादितर्सिं विमुच्य स्वार्थैकपरास्तेऽत्र जंगे ज्ञेयाः जिनकल्पिकाचार्यादयश्चात्र निदर्शनमिति तृतीयो जंगः ॥ २४ ॥ तथा तुर्यरत्नवत् केचिदाचार्या उभयथापि साराः, प्राग्वत् स्वात्मोपकारपरत्वेन, परेषामपीह प्रेत्य च द्रव्यतो भावतश्चोपकारित्वेन च ॥ २५ ॥ त्र्यधिकपंचदशशततापसयथेष्टपरमान्नाहारकेवलज्ञानप्रदायिश्रीगौतमगणधरादिवत्, तदुक्तं—न व्यो गुरुः सुरतरुर्विहितामिलार्धि—र्यत्केवलाय कवलार्थिषु गौतमोऽभूत् ॥ तापातुरेऽमृतरसः किंमु शैत्यमेव । नाऽप्रार्थितोऽपि वितरत्यजरामरत्वं ॥ २६ ॥

तमोए गइ काले विनय करीने अमोने अनेषणा करी; ते सांजळी सुहस्ती महाराज कहेवा लाग्या के, फरीने हुं तेम करीश नहीं, एम कही क्षमा याचवा लाग्या ॥ २३ ॥ एवी रीते जेओ गच्छ आदिकनी तजीने फक्त स्वार्थमांज तत्पर होय छे, तेओने आ त्रांगामां जाणवा; तथा अहीं जिनकल्पी आचार्य आदिकोने दृष्टांतरूपे जाणवा, एवी रीते त्रीजो त्रांगो जाणवो ॥ २४ ॥ वळी केटलाक आचार्यो चोथा रत्ननी पेठे बन्ने प्रकारे सारवाळा होय छे, केमके तेओ पूर्वे कह्या प्रमाणे पोताना उपकारमां अने परना उपकारमां तत्पर होवाथी आ लोक अने परलोकमां द्रव्यथी अने भावथी उपकारी होय छे ॥ २५ ॥ (कोनी पेठे? तोके) पंदरसो त्रण तापसोने इच्छा मुजब क्षीरनुं भोजन तथा केवलज्ञान आपनारा श्री गौतमस्वामी गणधर महाराजनी पेठे कह्युं छे के—धारण करेल छे घणीज ऋद्धिओ जेणे एवा श्रीगौतमस्वामी गुरु कोइक नवीन कल्पवृक्ष सरखा थया छे, केमके तेमणे कवलना (भोजनना) अर्थी एवा तापसो प्रत्ये केवलज्ञान आप्युं छे! केमके अमृतरस, तापातुर प्राणीने शुं केवल शीतलताज आपे छे? नहीं, परंतु प्रार्थना कर्या विना अजरामरपणुं पण आपे छे ॥ २६ ॥

श्रीकुमारपालनरेंद्रस्य बहुष्ववसरेषु ऐहिकोपकारकृत्पारत्रिकोपकारकृच्च श्रीहेमसूरिः, आमनृपादेर्द्विधाप्युपकारिणः श्रीबप्पभट्टिगुर्वादयश्चात्र निदर्शयितव्या इतितुर्यो नंगः ॥ २७ ॥ एषु प्रथमनंगगुरवस्त्याज्या एव, द्वितीयनंगगुरवोऽपि सुगुरुयोगसंभवे त्याज्या एव, यतस्तेषां प्रमादाचरणं पश्यतां श्रोतृणां तदुक्तधर्मेऽप्यनास्थोल्लासादिना प्रायो न तदुपकारसिद्धिरिति ॥ २८ ॥ यथोत्तरमुत्तरनंगगुरुद्वयं च योग्यमित्याराध्यं श्रेयोऽर्थिभिरिति, इत्युक्ता श्रीआचार्यानऽधिकृत्य चतुर्नंगी ॥ २९ ॥ अथ श्रमणगोचरा सा भाव्यते, तथाहि श्रमणानां स्वोपकारः सम्यक् चरणकरणसमाचरणादिः, परोपकारश्च गुरुतपस्विबालवृद्धग्लानवैयावृत्त्यादिः, ३० ॥

अहीं श्री कुमारपाळ राजाने घणे अवसरे आ श्लोक संबंधि उपकार करनारा तथा परलोक संबंधि उपकार करनारा श्रीहेमचंद्राचार्य तथा श्रीआमराजा आदिकोने बन्ने प्रकारे उपकार करनारा श्रीबप्पभट्टिगुरु आदिकोने दृष्टांतरूपे जाणवा; एवी रीते चोथो नांगो जाणवो ॥ २७ ॥ हवे ते नांगाओमांथी पहेला नांगाना गुरुओ तो तजवा लायकज छे, बीजा नांगाना गुरुओ पण सुगुरुनो योग मळते उते तजवा लायकज छे, केमके तेओनुं प्रमादी आचरण जोइने तेमणे कहेला धर्मपर श्रोताओने आस्थानो उल्लास आदिक न थवाथी तेओ तरफथी उपकारनी सिद्धि थती नथी ॥ २८ ॥ वळी ते पछीना बन्ने नांगाओवाळा गुरुओ योग्य छे, माटे कल्याणना अर्थीओए तेओने आराधवा जोइये, एवी रीते श्री आचार्योने आश्रीने चोनंगी कही ॥ २९ ॥ हवे साधुने आश्रीने ते चोनंगी कहे छे—साधुओनो स्वोपकार एटले सम्यक् प्रकारे चरण करणना समाचरण आदिकरूप जाणवो, तथा परोपकार एटले गुरु, तपस्वी, बाल, वृद्ध, तथा रोगी साधुनी वैयावच्च आदिकरूप जाणवो; ॥ ३० ॥

सम्यक्सामाचारीप्रवर्त्तनस्थिरीकरणादिकश्च, तत्र काचादिमणिवत् केऽपि श्रमणाः स्वोपकारपरोपकाराभ्यां रहितत्वात् द्विधाप्यसाराः, पार्श्वस्थादय एव ॥ ३१ ॥ केचित्तु द्वितीयरत्नवदंतरसाराः, स्वात्मोपकारहेतुसंयमगुणविकलत्वात्; बहिस्तुसाराः, ग्लानत्वाद्यवस्थासु सुसाधूनां वैयावृत्त्याद्युपकारपरत्वात्; ते च संविग्नपाक्षिकादय एव ॥ ३२ ॥ तदुक्तं—कांतारेरोहमद्धा—णओ मगेज्जन्नमाइकज्जेसु ॥ सव्वायरेण जयणाइ । कुणइज्जं साहु करणिज्जं ॥ ३३ ॥ एते च मनाग् योग्याः, संविग्नपाक्षिकत्वस्य तृतीयमार्गत्वात्, यदुक्तं—॥ ३४ ॥

तेमज सम्यक् प्रकारे सामाचारीना प्रवर्त्तनरूप तथा तेमां स्थिर करवा आदिकरूप पण परोपकार जाणवो; हवे त्यां काचआदिक मणिनी पेठे केटलाक साधुओ स्वोपकार तथा परोपकारथी रहित होवाथी बन्ने रीते सारविनाना छे, अने तेवा पासत्या आदिकोज छे ॥ ३१ ॥ वळी केटलाको तो बीजा रत्ननी पेठे अंदरथी सारविनाना होय छे, केमके तेओ पोताना उपकारना हेतुरूप एवा संयमगुणथी रहित होय छे; परंतु बहारथी तेओ सारवाळा होय छे, केमके सुसाधुओनी मांदगी आदिक अवस्थामां तेओ तेमनी वैयावच्च आदिक उपकार करवामां तत्पर होय छे; अने तेवा संवेगपक्षी आदिकोनेज जाणवा ॥ ३२ ॥ कह्युं छे के—*कांतार (अटवी), रोध, (नगर-दुर्गादिनो घेरो) अद्धा (दुर्भिक्ष आदिकाळ) अवम (बाळ) अने ग्लानि आदिक कार्य प्रसंगे जे साधुनुं कर्तव्य छे ते अति-आदरथी करे अर्थात् तेवे प्रसंगे सुसाधु जनोने अत्यंत सहायभूत थाय. एवो परमार्थ उक्त गाथानो होवो संभवे छे ॥ ३३ ॥ एवी रीतना ते संवेगपक्षीओ कंईक योग्य छे; केमके संवेगपक्षीओनो त्रीजो मार्ग छे. कह्युं छे के—॥ ३४ ॥

* आ गाथाना पूर्वार्द्धनो अर्थ बहु श्रुतोथी जाणी लेवो.

सावज्जजोगपरिवज्जणाई—सव्वुत्तमो जइधम्मो ॥ बीओ सावगधमो । तइओ संविग्गपक्खपहो ॥ ३५ ॥ इति द्वितीयो भंगः ॥ केचिच्च तृतीयरत्नवदंतः साराः, बहिः पुनरसाराः, स्वार्थैकनिष्टत्वात्, प्रतिमाप्रतिपन्नजिनकल्पिकादिसाधुवदिति तृतीयः ॥ ३६ ॥ केचित्तु तुर्यरत्नवदुभयथापि साराः, स्वस्य परस्य चोपकारित्वात्, श्रीभरतचक्रिबाहुबलिप्राग्भवबाहुसुबाहुश्रीवसुदेवजीवश्रीनंदिषेणादिमहर्षिवदिति चतुर्थः ॥ ३७ ॥ एते द्वये योग्यास्तद्भवे त्रिचतुरादिभवेषु वा सिद्धिगामिन इति उत्तरत्राप्येवं भावना ज्ञेयेत्युक्ता श्रमणानां चतुर्भंगी ॥ ३८ ॥

सावद्य योगोनो परिवर्जवारूप यतिधर्म सर्वथी उत्तम छे, तेथी उतरतो बीजो श्रावकधर्म छे, तथा तेथी उतरतो त्रीजो संवेगपक्षी धर्म छे ॥ ३५ ॥ एवी रीते बीजो भांगो जाणवो वळी केटलाक साधुओ त्रीजां रत्ननी पेठे अंदरथी सारवाळा तथा बहारथी सारविनाना होय छे, केमके तेओ पडिमाधारी जिनकल्पी साधु आदिकोनी पेठे फक्त स्वार्थमांज तत्पर होय छे; एवी रीते त्रीजो भांगो जाणवो ॥ ३६ ॥ वळी केटलाक साधुओ चोथां रत्ननी पेठे बन्ने प्रकारे सारवाळा होय छे, केमके तेओ पोताना तथा परना एम बन्नेना उपकारी होय छे; (कोनी पेठे ? तो के) श्री भरत चक्री तथा बाहुबलिना पूर्व भवना जीव एवा बाहु सुबाहु तथा श्रीवसुदेवना जीव श्रीनंदिषेण महर्षि आदिकनी पेठे; एवी रीते चोथो भांगो जाणवो ॥ ३७ ॥ ए बन्ने भांगावाळा साधुओने योग्य जाणवा, तथा तेओ ते भवे अथवा त्रीजा चोथा आदिक भवे मोक्ष गामी थाय छे; एवी रीते आगळ पण एज भावना जाणवी; एवी रीते साधुओनी चोभंगी कही ॥ ३८ ॥

अथ श्राद्धानां सा नाव्यते, तत्र श्राद्धाः केचिद्धर्मक्रियासु प्रमादित्वेन स्वं नवाब्धौ मज्जयंति, धर्मकारणतदुपदेशतत्साहाय्यदानादिविकलत्वेन परं स्वजनपरिजनाद्यमपि न तारयंतीत्युभयोपकाररहिता इति काचमणिवदुभयथाप्यसाराः, सहदेववत् तज्ज्ञातं यथा—॥ ३९ ॥ कुशस्थलपुरे विमलसहदेवौ भ्रातरौ, साधोः पार्श्वे प्रतिपन्नधर्मौ, अन्यदा तौ प्रागदेशे द्रव्याय चेलतुः ॥ ४० ॥ अर्धपथे विमलः पथिकेन प्रांजलनीरादियुतपथं पृष्टो न जानामीत्याह पापजीरुतया, क्व यास्यसीति पृष्टो यत्र पण्यार्थः ॥ ४१ ॥ निजपुरं वदेति, राजधान्यां वसामि, न मे किंचित्; त्वया सहा गच्छामीति च पृष्टाः स्वेच्छया गच्छतां वः के वयमिति चाऽवादीत् ॥ ४२ ॥

हवे श्रावकोनी ते चोभंगी कहे छे; त्यां केटलाक श्रावको धर्म क्रियामां प्रमादी रहेवाथी पोताने संसार समुद्रमां बुडाडे छे; तेमज धर्म करावबो, ते संबंधि उपदेश देवो, तथा ते माटे सहाय आपवो, इत्यादिक नहीं करवाथी परने एटले पोताना संबंधि तथा परिवार आदिकने पण तेओ तारी शकता नथी, माटे तेओ बन्ने रीते उपकार विनाना होय छे, अने तेथी काच मणिनी पेठे सहदेवनी माफक तेओ बन्ने रीते सारविनाना छे; ते सहदेवनुं उदाहरण नीचे मुजब छे ॥ ३९ ॥ कुशस्थल नामे नगरमां विमल अने सहदेव नामे बे भाइयो हता; तेओए साधु पासेथी धर्म स्वीकार्यो हतो; एक वखते तेओ धन माटे पूर्व देशमां चाल्या ॥ ४० ॥ अर्ध मार्गे कोइ वटेमार्गुए विमलने सारां पाणी आदिकवाळो मार्ग पूछयो त्यारे विमले पापना डरथी कहुं के, मने तेनी खबर नथी; पछी ज्यारे तेणे एम पूछयुं के तमो क्यां जाओ छो ? त्यारे तेणे कहुं के, ज्यां व्यापार मळे त्यां ॥ ४१ ॥ तारा नगरनुं नाम कहे ? एम पूछवाथी तेणे कहुं के, हुं राजधानीमां रहुं छुं, मारुं कंइ नथी; तारी साथे हुं आवुं ? एम पूछवाथी तेणे कयुं के, तमारी इच्छाथी चालता एवा तमोने अमोरो शो संबंध छे ? ॥ ४२ ॥

अथ पाकस्थाने सहागतपथिकेनाग्नियाचने मत्पार्श्वे नुंदव, नाग्निर्मपये, इत्युक्तौ पथिकेनाक्रोशने, वपुर्वृक्ष्यादिना नापने, प्राणांतेऽप्यक्रोधे स्वदिव्यरूपप्राकटःकृतौ इंद्रप्रशंसावृत्तोक्तौ वस्त्राऽुत्तरीये विषापहारमणिं निबध्य देवगमनेष्टं सहदेवादीनां तवृत्तोक्तौ ॥ ४३ ॥ नगरक्षोभं दृष्ट्वा प्रश्ने पुरुषोत्तमो राजाऽद्याऽहिदष्टपुत्रजीवयितुः राज्यार्धदानपटहं वादयतीत्युक्तौ सहदेवेन बलाच्चेलांचलान्मणिं ज्ञात्वा पटहस्पर्शे तज्जीवने सहदेववचसा ॥ ४४ ॥ राज्ञा विमलपार्श्वे आगत्य राज्यान्यर्थने, तेनारंजनिर्याऽग्रहणे गजारूढस्वगृहनयने सहदेवाय राज्यार्धदाने विमलस्याऽनिच्छतोऽपि श्रेष्ठिपदं गृहादि चार्पयत् ॥ ४५ ॥

पछी रसोइनी जगोए ते साथे आवेला पंथीए तेनी पासेथी अग्नि मागते छते, तेणे कह्युं के, तुं मारी पासे जोजन कर हुं अग्नि आपीश नहीं; ते सांजळी ते पंथिए क्रोध करी शरीर वधारवा आदिकथी तेने बीवरावते छते, तथा प्राणांते पण तेने नहीं चलायमान थयेलो जोइ, ते पंथीरूप देवे पोतानुं खरुं रूप प्रगट कर्युं, तथा इंद्रे करेली तेनी प्रशंसा आदिकनुं वृत्तांत तेने कह्युं, तथा आग्रहथी तेने दुपट्टे फेर दूर करनारुं मणि बांधीने देव गये छते, ते वृत्तांत विमले सहदेव आदिकोने कह्युं ॥ ४३ ॥ एटलामां नगरमां कोलाहल थतो जोइ पूछवाथी मालुम पमयुं के, पुरुषोत्तम राजा आजे सर्प डंखेला पोताना पुत्रने जीवाडनारने अरधुं राज्य आपवानो पटह वगडावे छे; तेथी सहदेवे बळात्कारे विमलना वस्त्रने छेडेथी मणि लइ पटहने स्पर्शी तेने जीवतो कर्यो, तथा सहदेवना वचनथी ॥ ४४ ॥ राजा विमल पासे आवी अरधुं राज्य लेवानी प्रार्थना करवा लाग्यो; त्यारे विमले आरंजना जयथी ते नहीं लेवाथी, राजा तेने हाथीपर चडावी पोताने घेर लइ गयो, तथा सहदेवने अरधुं राज्य आपी, विमलनी इच्छा नहोती, तोपण तेने राजाए शेठनी पदवी तथा घर आदिक आप्युं ॥ ४५ ॥

सहदेवस्तु राज्ये विषयेषु ८ गृध्नो महारंभरतो धर्मं तत्याज, साधर्मिकानप्यपीडयद-ऽन्यायकरादिभिः, दूरे तेषां धर्मसाहाय्यादि, विमलेन वारितोऽपि युद्धाद्यकरोत् ॥ ४६ ॥ जवाच च, राजकार्याणि कृतानि विज्ञोक्ष्यंते, धर्मोऽप्यवसरे करिष्यते, इत्यादि, तत्संगत्या तत्परिवारोऽपि तथैव धर्मपराङ्मुखोऽभूत् ॥ ४७ ॥ सोऽन्यदा वैरिप्रहित-घातकेन हतः, प्रथमं नरकं प्रापत् विमलस्तद्वैराग्याद् गाढतरं धर्ममाराध्य स्वर्गगतो, महाविदेहे सेत्स्यतीति प्रथमो नंगः ॥ ४८ ॥ एके पुनश्चारित्रमोहनीयप्राबल्यादिना स्वयं धर्मक्रियासु प्रमादिनोऽपि परैस्ताः कारयंति, तदुपदेशसाहाय्यकरणतद्विघ्नवा-रणादिभिः दीनाऽनाथादीनपि धनादिबलैरुपकुर्वतीति बहिःसाररत्नतुल्याः ॥ ४९ ॥

પછી સહદેવે તો રાજ્ય અને વિષયમાં લુબ્ધ થઇ મોટા આરંભથી ધર્મને છોડી દીધો, તથા અન્યાય અને કર આદિકોથી સાધર્મીઓને પણ દુઃખ આપવા લાગ્યો; વળી તેઓને ધર્મ આદિકમાં સહાય આપવી તો દૂર રહ્યો; વિમલે વાર્યા છતાં પણ તે યુદ્ધ આદિક કરવા લાગ્યો ॥ ૪૬ ॥ તથા કહેવા લાગ્યો કે, કરેલાં રાજકાર્યોને તપાસવાંજ જોઇયે, અવસરે ધર્મ પણ કરાશે; ઇત્યાદિ, એવી રીતે તેની સોબતથી તેનો પરિવાર પણ તેવીજ રીતે ધર્મથી પરાઙ્મુખ થયો ॥ ૪૭ ॥ પછી એક વખતે વૈરીએ મોકલેલા મારાથી હણાયો થકો તે પેહેલી નરકે ગયો; તેના વૈરાગ્યથી વિમલ ધર્મને વધારે આરાધીને સ્વર્ગે ગયો, તથા મહાવિદેહમાં મોક્ષે જશે, એવી રીતે પેહેલો ભાંગો જાણવો ॥ ૪૮ ॥ વળી કેટલાક શ્રાવકો ચારિત્ર મોહનીય કર્મની પ્રબલતાથી પોતે જોકે ધર્મ ક્રિયામાં પ્રમાદી હોય છે, તો પણ અન્યોપાસે તે કરાવે છે; એટલે તે ધર્મ સંબંધિ ઉપદેશ, સહાય કરાવો તથા તે સંબંધિ વિઘ્નોને નિવારવા આદિકે કરીને, તેમજ દીન તથા અનાથ આદિકોને ધન આદિકની મદદથી ઉપકાર કરે છે, માટે તેઓ બહારથી સારવાળા રત્ન સરખા છે, ॥ ૪૯ ॥

प्रविव्रजिषुस्वापत्याऽनिषेधिस्वसुताऽप्रव्रजितपूर्विशेषाशेषतपस्यार्थितपस्योत्सवकरणतत्कुटुंबनिर्वाहादिसाहाय्यकृत्तद्धेतुकतीर्थकरनामकर्मार्जकश्रीकृष्णनृपादिवत् ॥ ५० ॥ श्रीकृष्णादीनां केषांचिदंतःसम्यक्त्वादिभावेऽपि विरत्यादिविशेषगुणाऽभावेनाऽनुदराकन्येत्यादिवदंतरसारत्वं ज्ञेयमिति द्वितीयो भंगः ॥ ५१ ॥ अन्ये तु भ्रातृकलत्रपुत्रादिस्वजनपरिजनादिप्रतिबोधाऽशक्ताः परेषां धर्मसाहाय्याद्यक्षमाश्च, सम्यग् धर्मानुष्ठानैः स्वं भवात्तारणेनोपकुर्वंतीत्यंतः साररत्नतुल्याः, पूर्वभंगोक्तसहदेवाऽग्रजविमलवदिति तृतीयो भंगः ॥ ५२ ॥

दीक्षा लेवानी इच्छावाळा पोताना पुत्रोने निषेध नहीं करनारा, तथा पोताना पुत्रोए दीक्षा लीधा पेहेलां बाकीना सघळा तपस्याना अर्थीओनी तपस्यानो उत्सव करनारा, तथा तेओना कुटुंबिओने आजीविका आदिकनी साहाय करनारा, तथा तेथी तीर्थंकरनाम कर्म उपार्जन करनारा श्रीकृष्ण राजा आदिकनी पेठे तेवा श्रावको जाणवा ॥ ५० ॥ श्रीकृष्ण आदिक केटलाकोने अंदरथी समकीत आदिकनो भाव होते छते पण विरति आदिक विशेष गुणना अभावें करीने 'उदर विनानी कन्या' इत्यादिकनी पेठे अंदरथी असारपणुं जाणवुं ; एवी रीते बीजो भांगो जाणवो ॥ ५१ ॥ वळी केटलाक श्रावको भाइ, स्त्री, पुत्र आदिक स्वजन तथा परिवार आदिकने प्रतिबोधवाने अशक्त होय छे, तेमज बीजाओने पण धर्मनो सहाय आपवामां असमर्थ होय छे, परंतु सम्यक् प्रकारनी धर्मक्रियाओथी फक्त पोताने संसारथी तारवारूप उपकार करी शके छे, माटे तेओ अंदरथी सारवाळा रत्न सरखा छे; (कोनी पेठे ? तोके) पूर्वना भांगामां कहेला सहदेवना मोटा भाइ विमलनी पेठे एवी रीते त्रीजो भांगो जाणवो ॥ ५२ ॥

केचित्पुनः स्वपरोपकारसमर्था इत्युभयथा साररत्नोपमाः, श्रीकुमारपालनृपादिवत् ॥ ९३ ॥ तथाहि—श्रीकुमारपालस्य श्रीसम्यक्त्वमूलद्वादशव्रतपालनं, त्रिकालं जिनपूजा, अष्टमीचतुर्दश्योः पौषधोपवासः, पारणके दृष्टिपथगतानां परःशतानामपि यथार्हवृत्तिदानेन संतोषकरणं ॥ ९४ ॥ सार्धं गृहीतपौषधानां स्वावासे पारणककारणं, नग्नसाधर्मिकोद्धरणे सहस्रदीनारार्पणं, एकस्मिन्वर्षे साधर्मिकेभ्यः कोटिदीनारदानं ॥ ९५ ॥ एवं चतुर्दशवर्षेषु चतुर्दशकोटिदीनारदानं साधर्मिकेभ्यः, अष्टनवतिलक्षद्रव्यस्यौचित्ये प्रदानं, द्वासप्ततिलक्षद्रव्यऋणिलेखपत्रपाटनं, एकविंशतिश्रीज्ञानकोशलेखनं ॥ ९६ ॥

वळी केटलाक श्रावको पोताने अने परने एम बन्नेने उपकार करवाने समर्थ छे, एवी रीते तेओ बन्ने प्रकारथी श्रीकुमारपाल राजा आदिकनी पेठे सारवाळा रत्न सरखा छे ॥ ९३ ॥ ते कहे छे—श्रीकुमारपाल राजा समकीत मूळ बारे व्रतोने धरनारा हता, त्रिकाल जिनपूजा करता, आठम चौदसे पौषध सहित उपवास करता, पारणाने दिवसे दृष्टिए पमेला सेंकडो गमे मनुष्योने यथायोग्य आजीविका आपी संतुष्ट करता ॥ ९४ ॥ साथे पौषध करनाराओने पोताने घेर पारणां करावता, धनहीन थयेला साधर्मीने हजार सोनामोहोरो आपता, एकज वर्षमां साधर्मीओने क्रोड सोनामोहोरोनुं दान देता ॥ ९५ ॥ एवी रीते चौद वर्षोमां चौद क्रोड सोना मोहोरोनुं तेमणे साधर्मीओने दान आप्युं; अठाणुं लाख द्रव्यनुं उचित दान आप्युं, बोहोतेर लाख द्रव्य आवा करजदारोना लखत फडाव्या. एकवीस ज्ञान भंडार लखाव्या ॥ ९६ ॥

प्रत्यहं श्रीत्रिभुवनपालविहारे स्नात्रोत्सवः, श्रीहेमचंद्रसूरिगुरुपादपद्मेषु द्वादशावर्त्तवंदनकदानं, ततोऽनुक्रमेण सर्वसाधुवंदनं ॥ ५७ ॥ पूर्वप्रतिपन्नपौषधादिव्रताढ्यश्रावकवंदनमानदानादि, अष्टादशदेशेष्वमारिपटहदापनं, न्यायघंटावादनं, चतुर्दशदेशेषु पुनर्धनबलेन मैत्रीबलेन च जीवरक्षाकारणं ॥ ५८ ॥ चतुश्चत्वारिंशदधिकचतुःशतनव्यप्रासादकारणं, १६०० जीर्णोद्धाराः, सप्त श्रीतीर्थयात्राः, प्रथमव्रते मारिरित्यक्षरकथने उपवासकरणं ॥ ५९ ॥ द्वितीयव्रते विस्मृत्याद्यसत्यभाषणे आचाम्लादितपःकरणं, तृतीयव्रते मृतधनमोचनं, चतुर्थव्रते धर्मप्राप्त्यनंतरं पाणिग्रहणाऽकरणं, चतुर्मास्यां त्रिधा मनोवचनकायैः शीलपालनं ॥ ६० ॥

हमेशां श्रीत्रिभुवनपाल विहारमां स्नात्रोत्सव कराव्यो, श्रीहेमचंद्राचार्यना चरण कमलोमां द्वादशावर्त्त वंदन कर्युं, पछी अनुक्रमे सर्व साधुओने वंदन कर्युं ॥ ५७ ॥ पेहेलेथी पौषध आदिव्रत लेनार योग्य श्रावकने वंदन तथा मान आदिक आप्युं, अढार देशोमां अमारी पमो वजराव्यो, न्याय घंटा वगडाव्यो, वळी चौद देशोमां धनने बळे तथा मित्राइने बळे जीवरक्षा करावी, ॥ ५८ ॥ चारसो चुमाळीस नवां जिनमंदिरो कराव्यां, सोळसो जीर्णोद्धार कराव्या, सात तीर्थयात्रा करी; पेहेला व्रतमां 'मारि' अेवो जो अक्षर मुखथी बोलाय तो पण उपवास करता ॥ ५९ ॥ बीजा व्रतमां चूक्ष आदिकथी असत्य बोलतां आंबेल आदि तप करता, त्रीजा व्रतमां मृत्यु पामेलानुं द्रव्य नहीं लेता, चोथा व्रतमां धर्म पाम्या पछी परणवानुं नियम कर्युं; चोमासामां मन, वचन अने काया, एम त्रण प्रकारे शील पाळता ॥ ६० ॥

मनसा नंगे कृपणं, वाचा नंगे आचाम्लं, कायनंगे चैकाशनं, परनारीसहोदर-विरुदधरणं च, राज्ञी * नोपलदेव्यानार्याया मरणेऽपि प्रधानादिनिर्बहूच्यमानेऽपि पाणिग्रहणनियमस्याऽनंगः ॥ ६१ ॥ आरात्रिकार्थं सुवर्णमयनोपलदेवीमूर्त्तिकारणं, श्रीगुरुनिर्वासक्षेपपूर्वं राजर्षिविरुददानं, पंचमव्रतविस्तरस्तु यथा— ॥ × ॥ ॥ ६२ ॥ षट्कोट्यः कनकस्य, अष्टौकोट्यस्तारस्य, दशतुलाशतानि महर्घ्यमणिरत्नादीनां, ३२ सहस्रमणघृतं, ३२ सहस्रमणतैलं, ॥ ६३ ॥

मनथी शील नांगते छते कृपणक करता, वचनथी नांगते छते आंबेल करता, कायाथी नांगते छते एकाशन करता, परस्त्री प्रत्ये सहोदरनुं विरुद धारण करता, नोपलदेवी राणीना मृत्युबाद प्रधान आदिकोए घणुं कह्या छतां पण परणवाना नियमनो तेमणे नंग कर्यो नहीं ॥ ६१ ॥ आरात्रिक माटे नोपलदेवी राणीनी सुवर्णनी मूर्त्ति करावी, श्री गुरुमहाराजे वासक्षेपपूर्वक तेमने राजर्षिनुं बिरुद आप्युं; पांचमा व्रतनो विस्तार नीचे मुजब छे— ॥ ६२ ॥ छ क्रोड सोनामोहोर, आठ क्रोड रूपामहोर, दशसो तोला मोटी किंमतनां मणिरत्नो विगरे, बत्रीस हजार मण घी, बत्रीस हजार मण तेल ॥ ६३ ॥

---

* राज्ञीनोपलदेव्यादिनार्या ठ मरणेऽपि ॥ इति द्वितीयपुस्तकपाठः ॥

+ यथा ग्रंथांतराद्वाच्यः ॥ इति द्वितीयपुस्तकपाठः ॥

३ लक्षाः शालिचनकयुगंधरीमुद्गप्रभृतिधान्यमूटकानां प्रत्येकं पंचलक्षी, अश्वानां सहस्रं गजा अष्ट्राश्च प्रत्येकं पंचशतानि ॥ ६४ ॥ गृहहट्टसज्जायानपात्रशकटवाहिनीनामित्यादि; एकादशशतगजानां, ५० सहस्ररथानां, ११ लक्षा हयानां, १८ लक्षाः सुभटवराणामित्येवं सर्वसैन्यमेलापकः इत्यादि ॥ ६५ ॥ षष्ठे व्रते वर्षाकाले श्रीपत्तनपरिसरादधिकगतिनिषेधः, सप्तमे भोगोपभोगव्रते मद्यमांसमधुभ्रक्षणबहुबीजपंचोडुंबरफलाऽनद्याऽनंतकायघृतपूरादिनियमः ॥ ६६ ॥ देवाऽदत्तवस्त्रफलाहारादिवर्जनं, सचित्तमेकं पत्ररूपं दिने तद्बीटकाष्टकं, रात्रौ चतुर्विधाहारनिषेधः, वर्षास्वेका घृतविकृतिः, शाड्वलशाकनिषेधः ॥ ६७ ॥

त्रण लाख चावलना तथा चणा, जुवार अने मग आदिक धान्योना दरेकना पांच पांच लाख मुडा, एक हजार घोडा, हाथी तथा ऊंट दरेक पांचसो पांचसो ॥ ६४ ॥ घर, हाट सजा वहाण, गाडी पालखी इत्यादि; अग्यारसो हाथीओ, पचास हजार रथो, अग्यार लाख घोडा, अढार लाख सुभटो, एवी रीते सर्व सैन्यनो मेलापक हतो. इत्यादि ॥ ६५ ॥ छट्ठा व्रतमां वर्षाकाळमां श्री पाटणना सीमाडायी अधिक गमन करवानो निषेध हतो; सातमा भोगोपभोग व्रतमां मद्य, मांस, मध, माखण, बहुबीजां, पांच जातिना उडुंबर फळ, अनद्य, अनंतकाय तथा घेवर आदिकनो तेने नियम हतो; ॥ ६६ ॥ देवे नहीं दीधेलां वस्त्र, फळ तथा आहार आदिकनो त्याग हतो, एक पान रूपी सचित्त, अने तेना पण एक दिवसमां आठ बीडां तेने खपतां; रात्रिए चारे प्रकारना आहारनो निषेध हतो; वर्षाकाळमां एक घीनो विगय त्रुट हतो, शाद्वल शाकनो त्याग हतो; ॥ ६७ ॥

एकाशनं सदा, पर्वस्वब्रह्मविकृतिसचित्तवर्जनं; अष्टमव्रते सप्तव्यसनानां देशात्कर्षणं समुद्रतटे क्षेपणं ॥ ६८ ॥ नवमे व्रते जन्मयकाद्यसामायिककरणं, तस्मिन् कृते श्रीहेमसूरीन् विनाऽन्यैर्जल्पननिषेधः, प्रत्यहं १२ प्रकाश २० वीतरागस्तवगुणनं ॥ ६९ ॥ दशमव्रते चतुर्मासीकटकाऽकरणं, गाजणीसुरत्राणागमेऽपि नियमादऽक्षोभ्यादि वाच्यं; एकादशे व्रते पौषधोपवासे रात्रौ कायोत्सर्गकरणे मर्कोटकः पादे लग्नो जनैरुत्सार्यमाणोऽपि कोपान्न मुंचति ॥ ७० ॥ तन्मृतिशंकया स्वपादत्वचा सह तस्य दूरीकरणं; पारणके सर्वपौषधग्राहिभोजनं; अतिथिसंविभागव्रते दुःखिसाधर्मिकश्रावकलोकानां ७२ लक्षद्रव्यकरमोचनं ॥ ७१ ॥

हमेशां एकासणुं करता, पर्वने दिवसे मैथुन, विगय तथा सचित्तनो तेने त्याग हतो; आठमां व्रतमां तेणे सातेव्यसनोने देशमांथी कहाडी समुद्रमां फेंक्यां ॥ ६८ ॥ नवमां व्रतमां बन्ने वखत सामायिक करवुं, तथा ते करते छते श्री हेमचंद्राचार्य विना बीजाओ साथे बोलवानो तेने त्याग हतो, हमेशां बार प्रकाश (योग शास्त्रना) तथा वीस वीतरागस्तवनो पाठ करता ॥ ६९ ॥ दशमां व्रतमां चोमासामां रणसंग्राम न करवो; गीजनीनो सुलतान आवते छते पण नियमथी चलायमान नहोता थया; अग्यारमा व्रतमां पौषध उपवास करते छते रात्रिए कायोत्सर्ग ध्याने रह्या हता; ते वखते पगे मंकोडो चोट्यो, माणसो तेने उखेडवा लाग्या, परंतु क्रोधथी ते चोटीज रह्यो ॥ ७० ॥ ते वखते ते मंकोडो मरी जवानी शंकायी पोताना पगनी चांमडी सहित तेने दूर कर्यो; पारणाने दिवसे सघळा पोसातीओने जोजन करावता; अतिथि संविभाग व्रतमां दुःखी एवा साधर्मी श्रावकोनो बहोतेर लाख द्रव्यनो कर मूकी दीधो ॥ ७१ ॥

श्रीहेमसूरिधर्मशालमुखवस्त्रिकाप्रतिलेखकधार्मिकस्य पंचशततुरंगमषोडशग्रामाधिपतित्वप्रदानं, सर्वमुखवस्त्रिकाप्रतिलेखकानां ५०० ग्रामदानादि च ॥ ७२ ॥ एवमनेकविधास्तस्य विवेकिशिरोमणेरन्येऽपि पुण्यमार्गाः कियंतोऽत्र लेखितुं शक्यंते; इत्येवं तस्य स्वयं सम्यग्धर्मानुष्ठानेन स्वात्मन उपकारो नवरूयावशेषसंसारकरणादिरूपः ॥ ७३ ॥ साधर्मिकादीनां यथार्हदानमानधर्मसान्निध्यकरणकरमोचनसीदत्समुद्धरणादिनिरष्टादशदेशेष्वमारिप्रवर्त्तनादिनिश्च परोपकारोऽपि स्फुट एव ॥ ७४ ॥ इत्यंतर्बहिश्च सारत्वमिति साधुश्रीपृथ्वीधरसाहजगसिंहसाहमुहणसिंहादयोऽपि दृष्टांता योजनीया यथार्हमत्र, इत्युक्ता श्राद्धानाश्रित्य चतुर्भंगी ॥७५॥

श्री हेमचंद्रसूरिना धर्मशाळानी मुहपत्ति पडिलेहनार धार्मिकने पांचसो घोडा, तथा बार गामनुं अधिपतिपणुं आप्युं; तथा सघळी मुहपत्ति पडिलेहनारोने पांचसो गामोनुं दान आप्युं; ॥ ७२ ॥ एवी रीते विवेकीओमां शिरोमणि सरखा एवा ते कुमारपाळ राजाना बीजा पण अनेक प्रकारना पुण्यमार्गो हता, तेमांथी अहीं केटलाक लखी शकाय ? एवी रीते उत्तम धर्म क्रियाथी तेणे फक्त पोताना बाकी बे भवो रहेवा आदिक रूप पोतानो उपकार कर्यो ॥ ७३ ॥ तेमज साधर्मीओने योग्य दान, मान, धर्मनी सहायता, करोनुं ओछवुं, तथा दुःखीओना उद्धार आदिकथी, तथा अढार देशोमां अमारीना प्रवर्त्तन आदिकथी तेनो परोपकार पण प्रगटज देखाय छे ॥ ७४ ॥ एवी रीते तेनुं अंदरथी तथा बहारथी पण सारपणुं जाणवुं; एवी रीते साधु श्री पृथ्वीधर जगसिंहशाह, तथा मुहणसिंहशाह आदिकनां दृष्टांतो पण अहीं यथायोग्य रीते जोडी लेवा, एवी रीते श्रावकोने आश्रीने चोभंगी कही ॥ ७५ ॥

अथ सामान्यतो जीवानाश्रित्याप्येवमेव चतुर्भंगी वाच्या, नवरं श्राद्धा इति स्थाने केचिज्जीवा इति वाच्यं, दृष्टांताश्च यथार्हं साधुश्राद्धादयः सर्वेऽपि तत्रावतारणीया इति ॥ ७६ ॥ मत्वेति गुर्वादिगता इमा श्रुत—भंगीःसदांगीकृतशुद्धदर्शनाः ॥ तया यतध्वं भवैरिणो जय—श्रियं वृणीध्वं भविनोऽचिराद्यया ॥ ७७ ॥

॥ इतिश्रीतपागच्छेश्रीमुनिसुंदरसूरिविरचितेश्रीउपदेशरत्नाकरे रत्नदृष्टांतेनगुर्वादिस्वरूपव्यावर्णनरूपस्तरंगःससदशः ॥

हवे सामान्यथी जीवोने आश्रीने पण एवीज रीते चोभंगी जाणवी; एटलुं विशेष के, श्रावकोने ठेकाणे केटलाक जीवो एम कहेवुं; वळी अहीं साधु श्रावक आदिकनां सघळां दृष्टांतो पण यथायोग्य रीते उतारवां ॥ ७६ ॥ एवी रीते गुरु आदिक संबंधि आ चोभंगी जाणीने, हमेशां अंगीकार करेल छे. शुद्ध दर्शन जेओए एवा हे भविकलोको! तमो एवी रीते यत्न करो? के जेथी संसाररूपी शत्रुनो जय करवानी लक्ष्मीने तमो तुरत वरो ॥ ७७ ॥

॥ एवी रीते श्री तपागच्छमां श्रीमुनिसुंदर सूरिए रचेला श्री उपदेशरत्नाकरमां रत्नना दृष्टांते करीने गुरु आदिकनां स्वरूपने वर्णन करवारूप सत्तरमो तरंग समाप्त थयो. ॥

इति सप्तदशस्तरंगः समाप्तः

अथ अष्टादशस्तरंगः

पुनः प्रकारांतरेण श्रीगुर्वादिस्वरूपं प्ररूपयति—॥ मूलं ॥—वयणकिरिआ हि सारा—ऽसारा जहा हुंति चउविहकवाला ॥ तह गुरु सीसा सावय । वाया-विणयाइकम्मेहिं ॥ १ ॥

वळी प्रकारांतरथी श्री गुरु आदिकोनुं स्वरूप कहे छे—॥ मूळनो अर्थः ॥—जेम वचन अने क्रियावडे करीने सारवाळी तथा सारविनानी एम चार प्रकारनी खोपरीओ होय छे, तेम गुरु, शिष्य अने श्रावको वचन तथा विनय आदिक क्रियाओथी चार प्रकारना होय छे ॥ १ ॥

यथा वचनक्रियाभ्यां साराएसाराणि चेति चतुर्विधानि कपाल्लानि, तथा गुरवः शिष्याः श्रावकाश्च वाचा विनयादिक्रियाभिश्च सारा असाराश्चेति चतुर्विधाः स्युरिति संटंकः ॥ २ ॥ तत्र कपाल्लानीति करोटिका उच्यन्ते, ताश्च काश्चन साधिष्टायकाः स्युर्महापुरुषसंबंधिन्यः, तासु च काश्चन केनचिद्विधिवत्पूजिता वदन्ति पंचशतीं रत्नानि गृह्णाणेति ॥ ३ ॥ सद्यस्तान्यर्पयन्ति चेति वाचा क्रियया च द्विधापि सारा इति प्रथमः ॥ ४॥ काश्चिच्च तथैव वदंति, न त्वर्पयंति किंचिदपीति वाचा साराः, क्रियया त्वसारा इति द्वितीयः ॥ ५ ॥ अपराः पुनर्न ब्रूयुः किमपि, परं प्राग्वत्पूजिताः पूरयंत्यर्थितानीति वागसाराः क्रियासाराश्चेति तृतीयः ॥ ६ ॥

जेम वचन अने क्रियायी सारवाळी तथा सारविनानी एम चार प्रकारनी खोपरीयो होय छे, तेम गुरुओ, शिष्यो अने श्रावको वचनथी तथा विनय आदिक क्रियाओथी सारवाळा तथा सारविनाना एम चार प्रकारना होय छे, एवो संबंध छे ॥ २ ॥ त्यां कपाल एटले खोपरीओ कहेवाय छे; तेमांनी केटलीको महापुरुष संबंधि अधिष्टायकवाळी होय छे; तेमांनी केटलीक विधिपूर्वक पूज्याथी कहे छे के, पांचसो रत्न लयो ? ॥ ३ ॥ तेमज तुरत तेओ आपे पण छे, माटे तेओ वचनथी अने क्रियाथी पण एम बन्ने रीते सारवाळी छे, एवी रीते पेहेलो भांगो जाणवो ॥ ४ ॥ वळी केटलीक खोपरीओ तो तेम बोले छे, परंतु कंइ पण आपती नथी, माटे तेओ वचनथी सारवाळी छे, परंतु क्रियाथी सारविनानी छे ; ए बीजो भांगो जाणवो ॥ ५ ॥ वळी केटलीक कंइ बोलती नथी, परंतु पूर्वनी पेठे पूजवाथी इच्छित पूरे छे, माटे तेओ वचनथी सारविनानी परंतु क्रियाथी सारवाळी छे, ए त्रीजो भांगो जाणवो ॥ ६ ॥

याः पुनः सामान्यपुरुषसंबंधिन्यो निरतिशायास्ता न वदंति न च वितरंति किंचिदपीति द्विधाप्यसारा इति चतुर्थश्च विकल्पः ॥ ७ ॥ तथा गुर्वादीनप्याश्रित्य चतुर्भंगी, तत्र गुरुणां वाक्सारत्वं सदुपदेशकौशलवत्तराया, विनयः पंचमहाव्रतादिसम्यगनुष्ठानरूपः, तदादिमत्तया क्रियासारत्वं च ज्ञाव्यं ॥ ८ ॥ ततश्च केचिद्गुरवो द्विधापि साराः, श्रीवज्रस्वामीप्रभृतिवत् ॥ ९ ॥ अपरे तु वाचा साराः, क्रियया त्वसारास्तादृगुपदेशकौशलभृत्पार्श्वस्थाद्याचार्यवत् ॥ १० ॥ अन्ये वाचा असाराः क्रियया पुनः साराः मूककेवल्यादिवत् प्रत्येकबुद्धादिवच्च देशनाऽनासेवकः प्रत्येकबुद्धादिरित्यागमवचनात् ॥ ११ ॥

वळी जे खोपरीओ सामान्य पुरुषोनी तथा अतिशयो विनानी होय छे, तेओ बोलती पण नथी, तेम कंइ आपती पण नथी, माटे बन्ने रीते सारविनानी छे; एम चोथो विकल्प जाणवो ॥ ७ ॥ वळी एवी रीते गुरु आदिकोने आश्रीने पण नीचे मुजब चोभंगी थाय छे; तेमां गुरुजीनुं वचन संबंधि सारपणुं उत्तम उपदेशनी कुशलताथी होय छे, तथा विनय पंच महाव्रतोने सम्यक् प्रकारे पाळन करवारूप होय छे; अने इत्यादिकपणायें करीने क्रिया संबंधि सारपणुं पण जाणो होवुं ॥ ८ ॥ माटे केटलाक गुरुओ बन्ने रीते सारवाळा छे, (कोनी पेठे? तोके) श्रीवज्रस्वामी आदिकनी पेठे ॥ ९ ॥ वळी केटलाको वचनथी तो सारवाळा होय छे, परंतु क्रियाथी सारविनाना होय छे (कोनी पेठे? तोके) तेवा उपदेशनी कुशलतावाळा पासत्था आचार्य आदिकनी पेठे ॥१०॥ वळी केटलाको वचनथी सारविनाना होय छे, परंतु क्रियाथी सारवाळा होय छे, (कोनी पेठे? तोके) मूक केवली आदिकनी पेठे, तथा प्रत्येक बुद्ध आदिकनी पेठे; केमके आगममां कह्युं छे के प्रत्येक बुद्ध आदिक देशना नहीं सेवनारा छे ॥ ११ ॥

जनयथाप्यसाराश्च केचित्, उपदेशाऽकुशलपार्श्वस्थाद्याचार्यवदिति ॥ १२ ॥ अथ शिष्यानधिकृत्य नाव्यते, तत्र विनयो गुरुगोचरबहुमानः, यथार्हप्रतिपत्त्यादिर्विनयाध्ययनाद्युक्तः ॥ १३ ॥ तथाहि—पमिणीअं च बुड्ढाणं वाया अडुवकम्मुणा ॥ आवीवा जइ वा रहसे । नेवकुज्जाकयाइवि ॥ १४ ॥ न पल्लवओ न पुरओ । नेवकिच्चाण पिट्ठओ ॥ न जुंजे उरुणाउरुं । सयणे नो पमिस्सुणे ॥ १५ ॥ नेव पल्लंथिअंकुजा । पल्लवपिंमिवसंजए ॥ पाएपसारिए वावि । न चिट्ठे गुरुणंतिए ॥ १६ ॥ इत्यादि, अपि च, अह अट्ठहिं गाणेहिं । सिक्खसीलत्ती वुच्चइ ॥ अहस्सिरे सया दंते । न य मम्ममुदाहरे ॥ १७ ॥

वळी केटलाको तो उपदेश देवामां अकुशल एवा पासत्था आदिक आचार्यनी पेठे बन्ने प्रकारे सार-विनाना छे ॥ १२ ॥ हवे शिष्योने आश्रीने कहे छे; त्यां विनय एटले गुरु प्रत्ये बहुमान, यथायोग्य रीते तेमनी वैयावच्च आदिक, के जे संबंधि वर्णन (उत्तराध्ययनमां) विनय अध्ययन आदिकमां कर्युं छे ॥ १३ ॥ ते कहे छे—हे साधु! तुं ज्ञानीओ प्रत्ये प्रतिकुलपणुं नहीं आचरजे तेमज (तमो पण थोकुंज जाणो छो) इत्यादिक वचनें करीने, तेमज गुरुना संथारा आदिकने कचरवारूप कर्मे करीने प्रगट रीते अथवा गुप्त रीते तुं कदापि पण गुरुनो अविनय नहीं करजे ॥ १४ ॥ वळी आचार्य आदिकोनी पमखे, अगाडी, तेम पछाडी बेसवुं नहीं; तेमज गुरुना साथळ साथे पोतानो साथळ अडाडीने बेसवुं नहीं; तथा बीजानापर सुतां थकां अथवा बेठा थकांज 'अमो आम करीये छीये' इत्यादिक न कहेवुं ॥ १५ ॥ वळी गुरु समक्ष पल्लांठी नहीं वाळवी, तेम बन्ने पमखांने पिंमरुप नहीं करवा, तेम पग पण पसारवा नहीं तथा गुरुना निकटपर पण बेसवुं नहीं ॥ १६ ॥ वळी पण नीचे मुजब आठ स्थानको वर्जे करीने शिक्षाशील साधु कहीयें; हास्य न करे, हमेशां इंद्रियाने दमे, परना मर्मो प्रगट न करे ॥ १७ ॥

नासीले न विसीले । न सिआ अइलोलुए ॥ अकोहणे सच्चरए । सिक्खासीलत्ति वुच्चइ ॥ १८ ॥ तथा, अह पनरसहिंगाणेहिं । सुविणी इत्तिवुच्चइ ॥ नीआवत्ती अचवले । अमाई अकुतूहले ॥ १९ ॥ अप्पं वा हिक्खिवई । पबंधं च न कुव्वइ ॥ मित्तिज्जमाणो भयइ । सुअं लद्धुं न मज्जइ ॥ २० ॥ न य पावपरिक्खेवी । नय मित्तेसु कुप्पई ॥ अप्पियस्सावि मित्तस्स । रहे कल्लाण भासइ ॥ २१ ॥ कलहडमरवज्जए ॥ बुद्धे अभिजायए ॥ हरिमं पडिसंलीणो । सुविणी इत्ति वुच्चइ ॥ २२ ॥ इत्यादि, एवंविधं विनयं वाचा प्रतिपद्यंते, पालयंति चेति द्विधापि साराः केचित् शिष्याः श्रीचंद्ररुद्राचार्यशिष्यवत् श्रीसिंहगिरिसूरिशिष्यवच्च, तदुक्तं—'सीहगिरिसुसीसाणं नदं०' ॥ २३ ॥

शीघ्र रहित नहोय, अतिचारवाळा चारित्रवाळो नहोय, अति रसलंपट न होय, क्रोध रहित होय, तथा सत्यमां रक्त होय; एवी रीतनो साधु शिक्षाशील कहेवाय ॥ १८ ॥ वळी, हवे नीचे मुजब पन्नर स्थानको वर्जी करीने सुविनीत साधु कहीयें, ऋजुताइ विनानी वृत्तिवाळो, प्रारंभेलां कार्यमां अस्थिरपणा विनानो, कपट विनानो, कुतूहल विनानो ॥ १९ ॥ कोइनो पण अधिक्षेप (तिरस्कार) न करे, कोइने क्रोधित न करे, मित्राइ करनारपर प्रत्युपकार करे, तथा ज्ञान पामीने मद न करे ॥ २० ॥ पोतानो अपराध बीजापर नाखे नहीं, मित्र प्रत्ये क्रोध करे नहीं, अप्रिय एवा पण मित्रनुं श्रेयज कहे ॥ २१ ॥ कलेश तथा विग्रहने वर्जे, बुद्धिवान तथा कुलीनपणुं धारण करे, लज्जालुपणुं धारण करे, कार्य विना आमी अवळी चेष्टा न करे, एवी रीतना गुणवाळो शिष्य सुविनीत कहेवाय ॥ २२ ॥ एवी रीतना विनयने वचनथी जेओ स्वीकारे छे, तथा पाळे पण छे, तेओ केटलाक बन्ने रीते सारवाळा शिष्यो छे; (कोनी पेठे ? तोके) श्रीचंद्ररुद्र आचार्यना तथा श्री सिंहगिरिसूरिना शिष्यनी पेठे; कह्युं छे के—'सिंहगिरिना शिष्य प्रत्ये जद्र' ॥ २३ ॥

अपरे विनयं वाचा प्रतिपद्यंते न च समाचरंति, ततो वाचा साराः, क्रियया त्वसारा इति युगप्रधानश्रीकालकसूरिशिष्यवत् युगप्रधानोपघातिकुशिष्यवच्च । तथाहि— ॥ २४ ॥ कश्चिद्गुरुर्युगप्रधान उद्यतविहार्यपि क्षीणजंघाबल एकत्र स्थाने तस्थौ। तत्र श्राद्धैर्धीरोऽयमित्यर्हस्निग्धमधुराहारादि तस्मै सदाददे ॥ २५ ॥ तच्छिष्यास्तु गुरुकर्मत्वात्कदापि दध्युः कियच्चिरमयमजंगमः पाल्य इति ततस्तेनाऽनशनं जिग्राहयिषवो नक्तश्राद्धदत्ताहाहारं तस्मै न ददुः ॥ २६ ॥ अंतप्रांताद्यानीय विषण्ण इव तत्पुरे ऊचुः, किं कुर्मो यदीदृशानामपि वोऽर्हान्नाद्यविवेकाः श्राद्धाः सदपि दातुमशक्ता ॥ २७ ॥

